# Shri Shriyoganayika or RajarajeshvarI Sahasranama Stotram

# શ્રી શ્રીયોગનાયિકા અથવા રાજરાજેશ્વરી સહસ્રનામસ્તોત્રમ્

## Document Information

Text title : yoganAyikAsahasranAmastotram

File name : yoganAyikAsahasranAmastotram.itx

Category : devii, devI, sahasranAma, dashamahAvidyA

Location : doc_devii

Transliterated by : DPD, help fro Alex

Proofread by : DPD, Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com, PSA Easwaran

Description-comments : rAkArAdirakArAntAdyAkSharaghaTitam

Source : mahAkAlasaMhitA, Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રી શ્રીયોગનાયિકા અથવા રાજરાજેશ્વરી સહસ્રનામસ્તોત્રમ્

રાકારાદિરકારાન્તાદ્યાક્ષરઘટિતમ્ ।

રાજરાજેશ્વરી રાજરક્ષકી રાજનર્તકી ।
રાજવિદ્યા રાજપૂજ્યા રાજકોશસમૃદ્ધિદા ॥ ૧॥

રાજહંસતિરસ્કારિગમના રાજલોચના ।
રાજ્ઞાં ગુરુવરારાધ્યા રાજયુક્તનટાઙ્ગના ॥ ૨॥

રાજગર્ભા રાજકન્દકદલીસક્તમાનસા ।
રાજ્ઞાં કવિકુલાખ્યાતા રાજરોગનિવારિણી ॥ ૩॥

રાજૌષધિસુસમ્પન્ના રાજનીતિવિશારદા ।
રાજ્ઞાં સભાલઙ્કૃતાઙ્ગી રાજલક્ષણસંયુતા ॥ ૪॥

રાજદ્ધલા રાજવલ્લી રાજત્તિલ્વવનાધિપા ।
રાજસદ્ગુણનિર્દિષ્ટા રાજમાર્ગરથોત્સવા ॥ ૫॥

રાજચક્રાઙ્કિતકરા રાજાંશા રાજશાસના ।
રાજત્કૃપા રાજલક્ષ્મીઃ રાજત્કઞ્ચુકધારિણી ॥ ૬॥

રાજાહઙ્કારશમના રાજકાર્યધુરન્ધરા ।
રાજાજ્ઞા રાજમાતઙ્ગી રાજયન્ત્રકૃતાર્ચના ॥ ૭॥

રાજક્રીડા રાજવેશ્મપ્રવેશિતનિજાશ્રિતા ।
રાજમન્દિરવાસ્તવ્યા રાજસ્ત્રી રાજજાગરા ॥ ૮॥

રાજશાપવિનિર્મુક્તા રાજશ્રી રાજમન્ત્રિણી ।
રાજપુત્રી રાજમૈત્રી રાજાન્તઃપુરવાસિની ॥ ૯॥

રાજપાપવિનિર્મુક્તા રાજર્ષિપરિસેવિતા ।
રાજોત્તમમૃગારૂઢા રાજ્ઞસ્તેજઃપ્રદાયિની ॥ ૧૦॥

રાજાર્ચિતપદામ્ભોજા રાજાલઙ્કારવેષ્ટિતા ।

રાજસૂયસમારાધ્યા રાજસાહસ્રસેવિતા ॥ ૧૧॥

રાજસન્તાપશમની રાજશબ્દપરાયણા ।
રાજાર્હમણિભૂષાઢ્યા રાજચ્છૃઙ્ગારનાયિકા ॥ ૧૨॥

રાજદ્રુમૂલસંરાજદ્વિઘ્નેશવરદાયિની ।
રાજપર્વતકૌમારી રાજશૌર્યપ્રદાયિની ॥ ૧૩॥

રાજાભ્યન્તઃસમારાધ્યા રાજમૌલિમનસ્વિની ।
રાજમાતા રાજમાષપ્રિયાર્ચિતપદામ્બુજા ॥ ૧૪॥

રાજારિમર્દિની રાજ્ઞી રાજત્કલ્હારહસ્તકા ।
રામચન્દ્રસમારાધ્યા રામા રાજીવલોચના ॥ ૧૫॥

રાવણેશસમારાધ્યા રાકાચન્દ્રસમાનના ।
રાત્રિસૂક્તજપપ્રીતા રાગદ્વેષવિવર્જિતા ॥ ૧૬॥

રિઙ્ખન્નૂપુરપાદાબ્જા રિટ્યાદિપરિસેવિતા ।
રિપુસઙ્ઘકુલધ્વાન્તા રિગમસ્વરભૂષિતા ॥ ૧૭॥

રુક્મિણીશસહોદ્ભૂતા રુદ્રાણી રુરુભૈરવી ।
રુગ્ઘન્ત્રી રુદ્રકોપાગ્નિશમની રુદ્રસંસ્તુતા ॥ ૧૮॥

રુષાનિવારિણી રૂપલાવણ્યામ્બુધિચન્દ્રિકા ।
રૂપ્યાસનપ્રિયા રૂઢા રૂપ્યચન્દ્રશિખામણિઃ ॥ ૧૯॥

રેફવર્ણગલા રેવાનદીતીરવિહારિણી ।
રેણુકા રેણુકારાધ્યા રેવોર્ધ્વકૃતચક્રિણી ॥ ૨૦॥

રેણુકેયાખ્યકલ્પોક્તયજનપ્રીતમાનસા ।
રોમલમ્બિતવિધ્યણ્ડા રોમન્થમુનિસેવિતા ॥ ૨૧॥

રોમાવલિસુલાવણ્યમધ્યભાગસુશોભિતા ।
રોચનાગરુકસ્તૂરીચન્દનશ્રીવિલેપિતા ॥ ૨૨॥

રોહિણીશકૃતોત્તંસા રોહિણીપિતૃવન્દિતા ।
રોહિતાશ્વસુસમ્ભૂતા રૌહિણેયાનુજાર્ચિતા ॥ ૨૩॥

રૌપ્યસિંહાસનારૂઢચાક્ષુષ્મન્મન્ત્રવિગ્રહા ।
રૌદ્રમન્ત્રાભિષિક્તાઙ્ગી રૌદ્રમધ્યસમીડિતા ॥ ૨૪॥

રૌરવાન્તકરી રૌચ્યપત્રપુષ્પકૃતાર્ચના ।
રઙ્ગલાસ્યકૃતાલોલા રઙ્ગવલ્લ્યાદ્યલઙ્કૃતા ॥ ૨૫॥

રઞ્જકશ્રીસભામધ્યગાયકાન્તરવાસિની ।
લલિતા લડ્ડુકપ્રીતમાનસસ્કન્દજન્મભૂઃ ॥ ૨૬॥

લકારત્રયયુક્તશ્રીવિદ્યામન્ત્રકદમ્બકા ।
લક્ષણા લક્ષણારાધ્યા લક્ષબિલ્વાર્ચનપ્રિયા ॥ ૨૭॥

લજ્જાશીલા લક્ષણજ્ઞા લકુચાન્નકૃતાદરા ।
લલાટનયનાર્ધાઙ્ગી લવઙ્ગત્વક્સુગન્ધવાક્ ॥ ૨૮॥

લાજહોમપ્રિયા લાક્ષાગૃહે કૌન્તેયસેવિતા ।
લાઙ્ગલી લાલના લાલા લાલિકા લિઙ્ગપીઠગા ॥ ૨૯॥

લિપિવ્યષ્ટિસમષ્ટિજ્ઞા લિપિન્યસ્ત ત્રિણેત્રભૃત્ ।
લુઙ્ગાફલસમાસક્તા લુલાયાસુરઘાતુકી ॥ ૩૦॥

લૂતિકાપતિસમ્પૂજ્યા લૂતાવિસ્ફોટનાશિની ।
લૃલૄવર્ણસ્વરૂપાઢ્યા લેખિની લેખકપ્રિયા ॥ ૩૧॥

લેહ્યચોષ્યપેયખાદ્યભક્ષ્યભોજ્યાદિમપ્રિયા ।
લેપિતશ્રીચન્દનાઙ્ગી લૈઙ્ગમાર્ગપ્રપૂજિજતા ॥ ૩૨॥

લોલમ્બિરત્નહારાઙ્ગી લોલાક્ષી લોકવન્દિતા ।
લોપામુદ્રાર્ચિતપદા લોપામુદ્રાપતીડિતા ॥ ૩૩॥

લોભકામક્રોધમોહમદમાત્સર્યવારિતા ।
લોહજપ્રતિમાયન્ત્રવાસિની લોકરઞ્જિની ॥ ૩૪॥

લોકવેદ્યા લોલડોલાસ્થિતશમ્ભુવિહારિણી ।
લોલજિહ્વાપરીતાઙ્ગી લોકસંહારકારિણી ॥ ૩૫॥

લૌકિકીજ્યાવિદૂરસ્થા લઙ્કેશાનસુપૂજિતા ।
લમ્પટા લમ્બિમાલાભિનન્દિતા લવલીધરા ॥ ૩૬॥

વક્રતુણ્ડપ્રિયા વજ્રા વધૂટી વનવાસિની ।
વધૂર્વચનસન્તુષ્ટા વત્સલા વટુભૈરવી ॥ ૩૭॥

વટમૂલનિવાસાર્ધા વરવીરાઙ્ગનાવૃતા ।
વનિતા વર્ધની વર્ષ્યા વરાલીરાગલોલુપા ॥ ૩૮॥

વલયીકૃતમાહેશકરસૌવર્ણકન્ધરા ।
વરાઙ્ગી વસુધા વપ્રકેલિની વણિજા(જાં)વરા ॥ ૩૯॥

વપુરાયિતશ્રીચક્રા વરદા વરવર્ણિની ।
વરાહવદનારાધ્યા વર્ણપઞ્ચદશાત્મિકા ॥ ૪૦॥

વસિષ્ઠાર્ચ્યા વલ્કલાન્તર્હિતરમ્યસ્તનદ્વયી ।
વશિની વલ્લકી વર્ણા વર્ષાકાલપ્રપૂજિતા ॥ ૪૧॥

વલ્લી વસુદલપ્રાન્તવૃત્તકટ્યાશ્રિતાદરા ।
વર્ગા વરવૃષારૂઢા વષણ્મન્ત્રસુસંજ્ઞકા ॥ ૪૨॥

વલયાકારવૈડૂર્યવરકઙ્કણભૂષણા ।
વજ્રાઞ્ચિતશિરોભૂષા વજ્રમાઙ્ગલ્યભૂષિતા ॥ ૪૩॥

વાગ્વાદિની વામકેશી વાચસ્પતિવરપ્રદા ।
વાદિની વાગધિષ્ઠાત્રી વારુણી વાયુસેવિતા ॥ ૪૪॥

વાત્સ્યાયનસુતન્ત્રોક્તા વાણી વાક્યપદાર્થજા ।
વાદ્યઘોષપ્રિયા વાદ્યવૃન્દારમ્ભનટોત્સુકા ॥ ૪૫॥

વાપીકૂપસમીપસ્થા વાર્તાલી વામલોચના ।
વાસ્તોષ્પતીડ્યા વામાઙ્ઘ્રિધૃતનૂપુરશોભિતા ॥ ૪૬॥

વામા વારાણસીક્ષેત્રા વાડવેયવરપ્રદા ।
વામાઙ્ગા વાઞ્છિતફલદાત્રી વાચાલખણ્ડિતા ॥ ૪૭॥

વાચ્યવાચકવાક્યાર્થા વામના વાજિવાહના ।
વાસુકીકણ્ઠભૂષાઢ્યવામદેવપ્રિયાઙ્ગના ॥ ૪૮॥

વિજયા વિમલા વિશ્વા વિગ્રહા વિધૃતાઙ્કુશા ।
વિનોદવનવાસ્તવ્યા વિભક્તાણ્ડા વિધીડિતા ॥ ૪૯॥

વિક્રમા વિષજન્તુઘ્ની વિશ્વામિત્રવરપ્રદા ।
વિશ્વમ્ભરા વિષ્ણુશક્તિર્વિજિજ્ઞાસાવિચક્ષણા ॥ ૫૦॥

વિટઙ્કત્યાગરાજેન્દ્રપીઠસંસ્થા વિધીડિતા ।
વિદિતા વિશ્વજનની વિસ્તારિતચમૂબલા ॥ ૫૧॥

વિદ્યાવિનયસમ્પન્ના વિદ્યાદ્વાદશનાયિકા ।

વિભાકરાત્યર્બુદાભા વિધાત્રી વિન્ધ્યવાસિની ॥ ૫૨॥

વિરૂપાક્ષસખી વિશ્વનાથવામોરુસંસ્થિતા ।
વિશલ્યા વિશિખા વિઘ્ના વિપ્રરૂપા વિહારિણી ॥ ૫૩॥

વિનાયકગુહક્રીડા વિશાલાક્ષી વિરાગિણી ।
વિપુલા વિશ્વરૂપાખ્યા વિષઘ્ની વિશ્વભામિની ॥ ૫૪॥

વિશોકા વિરજા વિપ્રા વિદ્યુલ્લેખેવ ભાસુરા ।
વિપરીતરતિપ્રીતપતિર્વિજયસંયુતા ॥ ૫૫॥

વિરિઞ્ચિવિષ્ણુવનિતાધૃતચામરસેવિતા ।
વીરપાનપ્રિયા વીરા વીણાપુસ્તકધારિણી ॥ ૫૬॥

વીરમાર્તણ્ડવરદા વીરબાહુપ્રિયઙ્કરી ।
વીરાષ્ટાષ્ટકપરીતા વીરશૂરજનપ્રિયા ॥ ૫૭॥

વીજિતશ્રીચામરધૃલ્લક્ષ્મીવાણીનિષેવિતા ।
વીરલક્ષ્મીર્વીતિહોત્રનિટિલા વીરભદ્રકા ॥ ૫૮॥

વૃક્ષરાજસુમૂલસ્થા વૃષભધ્વજલાઞ્છના ।
વૃષાકપાયી વૃત્તજ્ઞા વૃદ્ધા વૃત્તાન્તનાયિકા ॥ ૫૯॥

વૃવૃવર્ણાઙ્ગવિન્યાસા વેણીકૃતશિરોરુહા ।
વેદિકા વેદવિનુતા વેતણ્ડકૃતવાહના ॥ ૬૦॥

વેદમાતા વેગહન્ત્રી વેતસીગૃહમધ્યગા ।
વેતાલનટનપ્રીતા વેઙ્કટાદ્રિનિવાસિની ॥ ૬૧॥

વેણુવીણામૃદઙ્ગાદિ વાદ્યઘોષવિશારદા ।
વેષિણી વૈનતેયાનુકમ્પિની વૈરિનાશિની ॥ ૬૨॥

વૈનાયકી વૈદ્યમાતા વૈષ્ણવી વૈણિકસ્વના ।
વૈજયન્તીષ્ટવરદા વૈકુણ્ઠવરસોદરી ॥ ૬૩॥

વૈશાખપૂજિતા વૈશ્યા વૈદેહી વૈદ્યશાસિની ।
વૈકુણ્ઠા વૈજયન્તીડ્યા વૈયાઘ્રમુનિસેવિતા ॥ ૬૪॥

વૈહાયસીનટીરાસા વૌષટ્શ્રૌષટ્સ્વરૂપિણી ।
વન્દિતા વઙ્ગદેશસ્થા વંશગાનવિનોદિની ॥ ૬૫॥

વમ્ર્યાદિરક્ષિકા વઙ્ક્રિર્વન્દારુજનવત્સલા ।
વન્દિતાખિલલોકશ્રીઃ વક્ષઃસ્થલમનોહરા ॥ ૬૬॥

શર્વાણી શરભાકારા શમ્ભજન્માનુરાગિણી ।
શક્વરી શમિતાઘૌઘા શક્તા શતકરાર્ચિતા ॥ ૬૭॥

શચી શરાવતી શક્રસેવ્યા શયિતસુન્દરી ।
શરભૃચ્છબરી શક્તિમોહિની શણપુષ્પિકા ॥ ૬૮॥

શકુન્તાક્ષી શકારાખ્યા શતસાહસ્રપુજિતા ।
શબ્દમાતા શતાવૃત્તિપૂજિતા શત્રુનાશિની ॥ ૬૯॥

શતાનન્દા શતમુખી શમીબિલ્વપ્રિયા શશી ।
શનકૈઃ પદવિન્યસ્તપ્રદક્ષિણનતિપ્રિયા ॥ ૭૦॥

શાતકુમ્ભાભિષિક્તાઙ્ગી શાતકુમ્ભસ્તનદ્વયી ।
શાતાતપમુનીન્દ્રેડ્યા શાલવૃક્ષકૃતાલયા ॥ ૭૧॥

શાસકા શાક્વરપ્રીતા શાલા શાકમ્ભરીનુતા ।
શાર્ઙ્ગપાણિબલા શાસ્તૃજનની શારદામ્બિકા ॥ ૭૨॥

શાપમુક્તમનુપ્રીતા શાબરીવેષધારિણી ।
શામ્ભવી શાશ્વતૈશ્વર્યા શાસનાધીનવલ્લભા ॥ ૭૩॥

શાસ્ત્રતત્ત્વાર્થનિલયા શાલિવાહનવન્દિતા ।
શાર્દૂલચર્મવાસ્તવ્યા શાન્તિપૌષ્ટિકનાયિકા ॥ ૭૪॥

શાન્તિદા શાલિદા શાપમોચિની શાડવપ્રિયા ।
શારિકા શુકહસ્તોર્ધ્વા શાખાનેકાન્તરશ્રુતા ॥ ૭૫॥

શાકલાદિમઋક્શાખામન્ત્રકીર્તિતવૈભવા ।
શિવકામેશ્વરાઙ્કસ્થા શિખણ્ડિમહિષી શિવા ॥ ૭૬॥

શિવારમ્ભા શિવાદ્વૈતા શિવસાયુજ્યદાયિની ।
શિવસઙ્કલ્પમન્ત્રેડ્યા શિવેન સહ મોદિતા ॥ ૭૭॥

શિરીષપુષ્પસઙ્કાશા શિતિકણ્ઠકુટુમ્બિની ।
શિવમાર્ગવિદાં શ્રેષ્ઠા શિવકામેશસુન્દરી ॥ ૭૮॥

શિવનાટ્યપરીતાઙ્ગી શિવજ્ઞાનપ્રદાયિની ।
શિવનૃત્તસદાલોકમાનસા શિવસાક્ષિણી ॥ ૭૯॥

શિવકામાખ્યકોષ્ઠસ્થા શિશુદા શિશુરક્ષકી ।
શિવાગમૈકરસિકા શિક્ષિતાસુરકન્યકા ॥ ૮૦॥

શિલ્પિશાલાકૃતાવાસા શિખિવાહા શિલામયી ।
શિંશપાવૃક્ષફલવદ્ભિન્નાનેકારિમસ્તકા ॥ ૮૧॥

શિરઃસ્થિતેન્દુચક્રાઙ્કા શિતિકુમ્ભસુમપ્રિયા ।
શિઞ્જન્નૂપુરભૂષાત્તકૃતમન્મથભેરિકા ॥ ૮૨॥

શિવેષ્ટા શિબિકારૂઢા શિવારાવાભયઙ્કરી ।
શિરોર્ધ્વનિલયાસીના શિવશક્ત્યૈક્યરૂપિણી ॥ ૮૩॥

શિવાસનસમાવિષ્ટા શિવાર્ચ્યા શિવવલ્લભા ।
શિવદર્શનસન્તુષ્ટા શિવમન્ત્રજપપ્રિયા ॥ ૮૪॥

શિવદૂતી શિવાનન્યા શિવાસનસમન્વિતા ।
શિષ્યાચરિતશૈલેશા શિવગાનવિગાયિની ॥ ૮૫॥

શિવશૈલકૃતાવાસા શિવામ્બા શિવકોમલા ।
શિવગઙ્ગાસરસ્તીરપ્રત્યઙ્મન્દિરવાસિની ॥ ૮૬॥

શિવાક્ષરારમ્ભપઞ્ચદશાક્ષરમનુપ્રિયા ।
શિખાદેવી શિવાભિન્ના શિવતત્ત્વવિમર્શિની ॥ ૮૭॥

શિવાલોકનસન્તુષ્ટા શિવાર્ધાઙ્ગસુકોમલા ।
શિવરાત્રિદિનારાધ્યા શિવસ્ય હૃદયઙ્ગમા ॥ ૮૮॥

શિવરૂપા શિવપરા શિવવાક્યાર્થબોધિની ।
શિવાર્ચનરતા શિલ્પલક્ષણા શિલ્પિસેવિતા ॥ ૮૯॥

શિવાગમરહસ્યોક્ત્યા શિવોહમ્ભાવિતાન્તરા ।
શિમ્બીજશ્રવણાનન્દા શિમન્તર્નામમન્ત્રરાટ્ ॥ ૯૦॥

શીકારા શીતલા શીલા શીતપઙ્કજમધ્યગા ।
શીતભીરુઃ શીઘ્રગન્ત્રી શીર્ષકા શીકરપ્રભા ॥ ૯૧॥

શીતચામીકરાભાસા શીર્ષોદ્ધૂપિતકુન્તલા ।
શીતગઙ્ગાજલસ્નાતા શુકા(ક્રા)રાધિતચક્રગા ॥ ૯૨॥

શુક્રપૂજ્યા શુચિઃ શુભ્રા શુક્તિમુક્તા શુભપ્રદા ।

શુચ્યન્તરઙ્ગા શુદ્ધાઙ્ગી શુદ્ધા શુકી શુચિવ્રતા ॥ ૯૩॥

શુદ્ધાન્તા શૂલિની શૂર્પકર્ણામ્બા શૂરવન્દિતા ।
શૂન્યવાદિમુખસ્તમ્ભા શૂરપદ્મારિજન્મભૂઃ ॥ ૯૪॥

શ‍ૃઙ્ગારરસસમ્પૂર્ણા શ‍ૃઙ્ગિણી શ‍ૃઙ્ગઘોષિણી ।
ભૃઙ્ગાભિષિક્તસુશિરાઃ શ‍ૃઙ્ગી શ‍ૃઙ્ખલદોર્ભટા ॥ ૯૫॥

શૃશ્વરૂપા શેષતલ્પભાગિની શેખરોડુપા ।
શોણશૈલકૃતાવાસા શોકમોહનિવારિણી ॥ ૯૬॥

શોધની શોભના શોચિષ્કેશતેજઃપ્રદાયિની ।
શૌરિપૂજ્યા શૌર્યવીર્યા શૌક્તિકેયસુમાલિકા ॥ ૯૭॥

શ્રીશ્ચ શ્રીધનસમ્પન્ના શ્રીકણ્ઠસ્વકુટુમ્બિની ।
શ્રીમાતા શ્રીફલી શ્રીલા શ્રીવૃક્ષા શ્રીપતીડિતા ॥ ૯૮॥

શ્રીસંજ્ઞાયુતતામ્બૂલા શ્રીમતી શ્રીધરાશ્રયા ।
શ્રીબેરબદ્ધમાલાઢ્યા શ્રીફલા શ્રીશિવાઙ્ગના ॥ ૯૯॥

શ્રુતિઃ શ્રુતિપદન્યસ્તા શ્રુતિસંસ્તુતવૈભવા ।
શ્રૂયમાણચતુર્વેદા શ્રેણિહંસનટાઙ્ઘ્રિકા ॥ ૧૦૦॥

શ્રેયસી શ્રેષ્ઠિધનદા શ્રોણાનક્ષત્રદેવતા ।
શ્રોણિપૂજ્યા શ્રોત્રકાન્તા શ્રોત્રે શ્રીચક્રભૂષિતા ॥ ૧૦૧॥

શ્રૌષડ્રૂપા શ્રૌતસ્માર્તવિહિતા શ્રૌતકામિની ।
શમ્બરારાતિસમ્પૂજ્યા શઙ્કરી શમ્ભુમોહિની ॥ ૧૦૨॥

ષષ્ઠી ષડાનનપ્રીતા ષટ્કર્મનિરતસ્તુતા ।
ષટ્શાસ્ત્રપારસન્દર્શા ષષ્ઠસ્વરવિભૂષિતા ॥ ૧૦૩॥

ષટ્કાલપૂજાનિરતા ષણ્ઢત્વપરિહારિણી ।
ષડ્રસપ્રીતરસના ષડ્ગ્રન્થિવિનિભેદિની ॥ ૧૦૪॥

ષડભિજ્ઞમતધ્વંસી ષડ્જસંવાદિવાહિતા ।
ષટ્ત્રિંશત્તત્ત્વસમ્ભૂતા ષણ્ણવત્યુપશોભિતા ॥ ૧૦૫॥

ષણ્ણવતિતત્ત્વનિત્યા ષડઙ્ગશ્રુતિપારદૃક્ ।
ષાણ્ડદેહાર્ધભાગસ્થા ષાડ્ગુણ્યપરિપૂરિતા ॥ ૧૦૬॥

ષોડશાક્ષરમન્ત્રાર્થા ષોડશસ્વરમાતૃકા ।
ષોઢાવિભક્તષોઢાર્ણા ષોઢાન્યાસપરાયણા ॥ ૧૦૭॥

સકલા સચ્ચિદાનન્દા સાધ્વી સારસ્વતપ્રદા ।
સાયુજ્યપદવીદાત્રી તથા સિંહાસનેશ્વરી ॥ ૧૦૮॥

સિનીવાલી સિન્ધુસીમા સીતા સીમન્તિનીસુખા ।
સુનન્દા સૂક્ષ્મદર્શાઙ્ગી સૃણિપાશવિધારિણી ॥ ૧૦૯॥

સૃષ્ટિસ્થિતિસંહારતિરોધાનાનુગ્રહાત્મિકા ।
સેવ્યા સેવકસંરક્ષા સૈંહિકેયગ્રહાર્ચિતા ॥ ૧૧૦॥

સોઽહમ્ભાવૈકસુલભા સોમસૂર્યાગ્નિમણ્ડના ।
સૌઃકારરૂપા સૌભાગ્યવર્ધિની સંવિદાકૃતિઃ ॥ ૧૧૧॥

સંસ્કૃતા સંહિતા સઙ્ઘા સહસ્રારનટાઙ્ગના ।
હકારદ્વયસન્દિગ્ધમધ્યકૂટમનુપ્રભા ॥ ૧૧૨॥

હયગ્રીવમુખારાધ્યા હરિર્હરપતિવ્રતા ।
હાદિવિદ્યા હાસ્યભસ્મીકૃતત્રિપુરસુન્દરી ॥ ૧૧૩॥

હાટકશ્રીસભાનાથા હિઙ્કારમન્ત્રચિન્મયી ।
હિરણ્મયપુ(પ)રાકોશા હિમા હીરકકઙ્કણા ॥ ૧૧૪॥

હ્રીઙ્કારત્રયસમ્પૂર્ણા હ્લીઙ્કારજપસૌખ્યદા ।
હુતાશનમુખારાધ્યા હુઙ્કારહતકિલ્બિષા ॥ ૧૧૫॥

હૂં પૃચ્છા(ષ્ટા)નેકવિજ્ઞપ્તિઃ હૃદયાકારતાણ્ડવા ।
હૃદ્ગ્રન્થિભેદિકા હૃલ્લ્મન્ત્રવર્ણસ્વરૂપિણી ॥ ૧૧૬॥

હેમસભામધ્યગતા હેમા હૈમવતીશ્વરી ।
હૈયઙ્ગવીનહૃદયા હોરા હૌઙ્કારરૂપિણી ॥ ૧૧૭॥

હંસકાન્તા હંસમન્ત્રતત્ત્વાર્થાદિમબોધિની ।
હસ્તપદ્માલિઙ્ગિતામ્રનાથાઽદ્ભુતશરીરિણી ॥ ૧૧૮॥

અનૃતાનૃતસંવેદ્યા અપર્ણા ચાર્ભકાઽઽત્મજા ।
આદિભૂસદનાકારજાનુદ્વયવિરાજિતા ॥ ૧૧૯॥

આત્મવિદ્યા ચેક્ષુચાપવિધાત્રીન્દુકલાધરા ।
ઇન્દ્રાક્ષીષ્ટાર્થદા ચેન્દ્રા ચેરમ્મદસમપ્રભા ॥ ૧૨૦॥

ઇકારચતુરોપેતા ચેશતાણ્ડવસાક્ષિણી ।
ઉમોગ્રભૈરવાકારા ઊર્ધ્વરેતોવ્રતાઙ્ગના ॥ ૧૨૧॥

ઋષિસ્તુતા ઋતુમતી ઋજુમાર્ગપ્રદર્શિની ।
ઋજુવાદનસન્તુષ્ટા લૃલૄવર્ણમનુસ્વના ॥ ૧૨૨॥

એધમાનપ્રભા ચૈલા ચૈકાન્તા ચૈકપાટલા ।
એત્યક્ષરદ્વિતીયાઙ્કાદિવિદ્યાસ્વરૂપિણી ॥ ૧૨૩॥

ઐન્દ્રા ચૈશ્વર્યદા ચૌજા ઓઙ્કારાર્થપ્રદર્શિની ।
ઔષધાયિત સાહસ્રનામમન્ત્રકદમ્બકા ॥ ૧૨૪॥

અમ્બા ચામ્ભોજનિલયા ચાંશભૂતાન્યદેવતા ।
અર્હણાઽઽહવનીયાગ્નિમધ્યગાઽહમિતીરિતા ॥ ૧૨૫॥

કલ્યાણી કત્રયાકારા કાઞ્ચીપુરનિવાસિની ।
કાત્યાયની કામકલા કાલમેઘાભમૂર્ધજા ॥ ૧૨૬॥

કાન્તા કામ્યા કામજાતા કામાક્ષી કિઙ્કિણીયુતા ।
કીનાશનાયિકા કુબ્જકન્યકા કુઙ્કુમાકૃતિઃ ॥ ૧૨૭॥

કુલ્લુકાસેતુસંયુક્તા કુરઙ્ગનયના કુલા ।
કૂલઙ્કષકૃપાસિન્ધુઃ કૂર્મપીઠોપરિસ્થિતા ॥ ૧૨૮॥

કૃશાઙ્ગી કૃત્તિવસના ક્લીઙ્કારી ક્લીમ્મનૂદિતા ।
કેસરા કેલિકાસારા કેતકીપુષ્પભાસુરા ॥ ૧૨૯॥

કૈલાસવાસા કૈવલ્યપદસઞ્ચારયોગિની ।
કોશામ્બા કોપરહિતા કોમલા કૌસ્તુભાન્વિતા ॥ ૧૩૦॥

કૌશિકી કંસદૃષ્ટાઙ્ગી કઞ્ચુકી કર્મસાક્ષિણી ।
ક્ષમા ક્ષાન્તિઃ ક્ષિતીશાર્ચ્યા ક્ષીરાબ્ધિકૃતવાસિની ॥ ૧૩૧॥

ક્ષુરિકાસ્ત્રા ક્ષેત્રસંસ્થા ક્ષૌમામ્બરસુશુભ્રગા ।
ખવાસા ખણ્ડિકા ખાઙ્કુકોટિકોટિસમપ્રભા ॥ ૧૩૨॥

ખિલકર્સૂક્તજપાસક્તા ખેટગ્રહાર્ચિતાન્તરા ।
ખણ્ડિતા ખણ્ડપરશુસમાશ્લિષ્ટકલેવરા ॥ ૧૩૩॥

ગવ્ય(વય) શ‍ૃઙ્ગાભિષિક્તાઙ્ગી ગવાક્ષી ગવ્યમજ્જના ।

ગણાધિપપ્રસૂર્ગમ્યા ગાયત્રી ગાનમાલિકા ॥ ૧૩૪॥

ગાર્હપત્યાગ્નિસમ્પૂજ્યા ગિરીશા ગિરિજા ચ ગીઃ ।
ગીર્વાણીવીજનાનન્દા ગીતિશાસ્ત્રાનુબોધિની ॥ ૧૩૫॥

ગુગ્ગુલો(લૂ)પેતધૂપાઢ્યા ગુડાન્નપ્રીતમાનસા ।
ગૂઢકોશાન્તરારાધ્યા ગૂઢશબ્દવિનોદિની ॥ ૧૩૬॥

ગૃહસ્થાશ્રમસમ્ભાવ્યા ગૃહશ્રેણીકૃતોત્સવા ।
ગૃ ગ્લૃ શબ્દસુવિજ્ઞાત્રી ગેયગાનવિગાયિની ॥ ૧૩૭॥

ગૈરિકાભરણપ્રીતા ગોમાતા ગોપવન્દિતા ।
ગૌરી ગૌરવત્રૈપુણ્ડ્રા ગઙ્ગા ગન્ધર્વવન્દિતા ॥ ૧૩૮॥

ગહના ગહ્વરાકારદહરાન્તઃસ્થિતા ઘટા ।
ઘટિકા ઘનસારાદિનીરાજનસમપ્રભા ॥ ૧૩૯॥

ઘારિપૂજ્યા ઘુસૃણાભા ઘૂર્ણિતાશેષસૈનિકા ।
ઘૃઘૃઘ્લૃ સ્વરસમ્પન્ના ઘોરસંસારનાશિની ॥ ૧૪૦॥

ઘોષા ઘૌષાક્તખડ્ગાસ્ત્રા ઘણ્ટામણ્ડલમણ્ડિતા ।
ઙકારા ચતુરા ચક્રી ચામુણ્ડા ચારુવીક્ષણા ॥ ૧૪૧॥

ચિન્તામણિમનુધ્યેયા ચિત્રા ચિત્રાર્ચિતા ચિતિઃ ।
ચિદાનન્દા ચિત્રિણી ચિચ્ચિન્ત્યા ચિદમ્બરેશ્વરી ॥ ૧૪૨॥

ચીનપટ્ટાંશુકાલેપકટિદેશસમન્વિતા ।
ચુલુકીકૃતવારાશિમુનિસેવિતપાદુકા ॥ ૧૪૩॥

ચુમ્બિતસ્કન્દવિઘ્નેશપરમેશપ્રિયંવદા ।
ચૂલિકા ચૂર્ણિકા ચૂર્ણકુન્તલા ચેટિકાવૃતા ॥ ૧૪૪॥

ચૈત્રી ચૈત્રરથારૂઢા ચોલભૂપાલવન્દિતા ।
ચોરિતાનેકહૃત્પદ્મા ચૌક્ષા ચન્દ્રકલાધરા ॥ ૧૪૫॥

ચર્મકૃષ્ણમૃગાધિષ્ઠા છત્રચામરસેવિતા ।
છાન્દોગ્યોપનિષદ્ગીતા છાદિતાણ્ડસ્વશામ્બરી ॥ ૧૪૬॥

છાન્દસાનાં સ્વયંવ્યક્તા છાયામાર્તાણ્ડસેવિતા ।
છાયાપુત્રસમારાધ્યા છિન્નમસ્તા વરપ્રદા ॥ ૧૪૭॥

જયદા જગતીકન્દા જટાધરધૃતા જયા ।
જાહ્નવી જાતવેદાખ્યા જાપકેષ્ટહિતપ્રદા ॥ ૧૪૮॥

જાલન્ધરાસનાસીના જિગીષા જિતસર્વભૂઃ ।
જિષ્ણુર્જિહ્વાગ્રનિલયા જીવની જીવકેષ્ટદા ॥ ૧૪૯॥

જુગુપ્સાઢ્યા જૂતિર્જૂ(જૂ)ર્ણા જૃમ્ભકાસુરસૂદિની ।
જૈત્રી જૈવાતૃકોત્તંસા જોટિં(ષં)ગા જોષદાયિની ॥ ૧૫૦॥

ઝઞ્ઝાનિલમહાવેગા ઝષા ઝર્ઝરઘોષિણી ।
ઝિણ્ટીસુમપરપ્રેમ્ણા( પ્રીતા) ઝિલ્લિકાકેલિલાલિતા ॥ ૧૫૧॥

ટઙ્કહસ્તા ટઙ્કિતજ્યા ટિટ્ટરીવાદ્યસુપ્રિયા ।
ટિટ્ટિભાસનહૃત્સંસ્થા ઠવર્ગચતુરાનના ॥ ૧૫૨॥

ડમડ્ડમરુવાદ્યૂર્ધ્વા ણકારાક્ષરરૂપિણી ।
તત્ત્વજ્ઞા તરુણી સેવ્યા તપ્તજામ્બૂનદપ્રભા ॥ ૧૫૩॥

તત્ત્વપુસ્તોલ્લસત્પાણિઃ તપનોડુપલોચના ।
તાર્તીયભૂપુરાત્મસ્વપાદુકા તાપસેડિતા ॥ ૧૫૪॥

તિલકાયિતસર્વેશનિટિલેક્ષણશોભના ।
તિથિસ્તિલ્લવનાન્તઃસ્થા તીક્ષ્ણા તીર્થાન્તલિઙ્ગયુક્ ॥ ૧૫૫॥

તુલસી તુરગારૂઢા તૂલિની તૂર્યવાદિની ।
તૃપ્તા તૃણીકૃતારાતિસેનાસઙ્ઘમહાભટા ॥ ૧૫૬॥

તેજિનીવનમાયૂરી તૈલાદ્યૈરભિષેચિતા ।
તોરણાઙ્કિતનક્ષત્રા તોટકીવૃત્તસન્નુતા ॥ ૧૫૭॥

તૌણીરપુષ્પવિશિખા તૌર્યત્રિકસમન્વિતા ।
તન્ત્રિણી તર્કશાસ્ત્રજ્ઞા તર્કવાર્તાવિદૂરગા ॥ ૧૫૮॥

તર્જન્યઙ્ગુષ્ઠસંલગ્નમુદ્રાઞ્ચિતકરાબ્જિકા ।
થકારિણી થાં થીં થોં થૈં કૃતલાસ્યસમર્થકા ॥ ૧૫૯॥

દશાશ્વરથસંરૂઢા દક્ષિણામૂર્તિસંયુગા ।
દશબાહુપ્રિયા દહ્રા દશાશાશાસનેડિતા ॥ ૧૬૦॥

દારકા દારુકારણ્યવાસિની દિગ્વિલાસિની ।
દીક્ષિતા દીક્ષિતારાધ્યા દીનસન્તાપનાશિની ॥ ૧૬૧॥

દીપાગ્રમઙ્ગલા દીપ્તા દીવ્યદ્બ્રહ્માણ્ડમેખલા ।
દુરત્યયા દુરારાધ્યા દુર્ગા દુઃખનિવારિણી ॥ ૧૬૨॥

દૂર્વાસતાપસારાધ્યા દૂતી દૂર્વાપ્રિયપ્રસૂઃ ।
દૃષ્ટાન્તરહિતા દેવમાતા દૈત્યવિભઞ્જિની ॥ ૧૬૩॥

દૈવિકાગારયન્ત્રસ્થા દોર્દ્વન્દ્વાતીતમાનસા ।
દૌર્ભાગ્યનાશિની દૌતી દૌવારિકનિધિદ્વયી ॥ ૧૬૪॥

દણ્ડિનીમન્ત્રિણીમુખ્યા દહરાકામધ્યગા ।
દર્ભારણ્યકૃતાવાસા દહ્રવિદ્યાવિલાસિની ॥ ૧૬૫॥

ધન્વન્તરીડ્યા ધનદા ધારાસાહસ્રસેચના ।
ધેનુમુદ્રા ધેનુપૂજ્યા ધૈર્યા ધૌમ્યનુતિપ્રિયા ॥ ૧૬૬॥

નમિતા નગરાવાસા નટી નલિનપાદુકા ।
નકુલી નાભિનાલાગ્રા નાભાવષ્ટદલાબ્જિની ॥ ૧૬૭॥

નારિકેલામૃતપ્રીતા નારીસમ્મોહનાકૃતિઃ ।
નિગમાશ્વરથારૂઢા નીલલોહિતનાયિકા ॥ ૧૬૮॥

નીલોત્પલપ્રિયા નીલા નીલામ્બા નીપવાટિકા ।
નુતકલ્યાણવરદા નૂતના નૃપપૂજિતા ॥ ૧૬૯॥

નૃહરિસ્તુતહૃત્પૂર્ણા નૃત્તેશી નૃત્તસાક્ષિણી ।
નૈગમજ્ઞાનસંસેવ્યા નૈગમજ્ઞાનદુર્લભા ॥ ૧૭૦॥

નૌકારૂઢેશ વામોરુવીક્ષિતસ્થિરસુન્દરી ।
નન્દિવિદ્યા નન્દિકેશવિનુતા નન્દનાનના ॥ ૧૭૧॥

નન્દિની નન્દજા નમ્યા નન્દિતાશેષભૂપુરા ।
નર્મદા પરમાદ્વૈતભાવિતા પરિપન્થિની ॥ ૧૭૨॥

પરા પરીતદિવ્યૌઘા પરશમ્ભુપુરન્ધ્રિકા ।
પથ્યા પરબ્રહ્મપત્ની પતઞ્જલિસુપૂજિતા ॥ ૧૭૩॥

પદ્માક્ષી પદ્મિની પદ્મા પરમા પદ્મગન્ધિની ।
પયસ્વિની પરેશાના પદ્મનાભસહોદરી ॥ ૧૭૪॥

પરાર્ધા પરમૈશ્વર્યકારણા પરમેશ્વરી ।

પાતઞ્જલાખ્યકલ્પોક્તશિવાવરણસંયુતા ॥ ૧૭૫॥

પાશકોદણ્ડસુમભૃત્ પારિપાર્શ્વકસન્નુતા ।
પિઞ્છા(ઞ્જા)વિલેપસુમુખા પિતૃતુલ્યા પિનાકિની ॥ ૧૭૬॥

પીતચન્દનસૌગન્ધા પીતામ્બરસહોદ્ભવા ।
પુણ્ડરીકપુરીમધ્યવર્તિની પુષ્ટિવર્ધિની ॥ ૧૭૭॥

પૂરયન્તી પૂર્યમાણા પૂર્ણાભા પૂર્ણિમાન્તરા ।
પૃચ્છામાત્રાતિશુભદા પૃથ્વીમણ્ડલશાસિની ॥ ૧૭૮॥

પૃતના પેશલા પેરુમણ્ડલા પૈત્રરક્ષકી ।
પૌષી પૌણ્ડ્રેક્ષુકોદણ્ડા પઞ્ચપઞ્ચાક્ષરી મનુઃ ॥ ૧૭૯॥

પઞ્ચમીતિથિસમ્ભાવ્યા પઞ્ચકોશાન્તરસ્થિતા ।
ફણાધિપસમારાધ્યા ફણામણિવિભૂષિતા ॥ ૧૮૦॥

બકપુષ્પકૃતોત્તંસા બગલા બલિની બલા ।
બાલાર્કમણ્ડલાભાસા બાલા બાલવિનોદિની ॥ ૧૮૧॥

બિન્દુચક્રશિવાઙ્કસ્થા બિલ્વભૂષિતમૂર્ધજા ।
બીજાપૂરફલાસક્તા બીભત્સાવહદૃક્ત્રયી ॥ ૧૮૨॥

બુભુક્ષાવર્જિતા બુદ્ધિસાક્ષિણી બુધવર્ષકા ।
બૃહતી બૃહદારણ્યનુતા બૃહસ્પતીડિતા ॥ ૧૮૩॥

બેરાખ્યા બૈન્દવાકાર વૈરિઞ્ચસુષિરાન્તરા ।
બોદ્ધ્રી બોધાયના બૌદ્ધદર્શના બન્ધમોચની ॥ ૧૮૪॥

ભટ્ટારિકા ભદ્રકાલી ભારતીભા ભિષગ્વરા ।
ભિત્તિકા ભિન્નદૈત્યાઙ્ગા ભિક્ષાટનસહાનુગા ॥ ૧૮૫॥

ભીષણા ભીતિરહિતા ભુવનત્રયશઙ્કરા ।
ભૂતઘ્ની ભૂતદમની ભૂતેશાલિઙ્ગનોત્સુકા ॥ ૧૮૬॥

ભૂતિભૂષિતસર્વાઙ્ગી ભૃગ્વઙ્ગિરમુનિપ્રિયા ।
ભૃઙ્ગિનાટ્યવિનોદજ્ઞા ભૈરવપ્રીતિદાયિની ॥ ૧૮૭॥

ભોગિની ભોગશમની ભોગમોક્ષપ્રદાયિની ।
ભૌમપૂજ્યા ભણ્ડહન્ત્રી ભગ્નદક્ષક્રતુપ્રિયા ॥ ૧૮૮॥

મકારપઞ્ચમી મહ્યા મદની મકરધ્વજા ।
મત્સ્યાક્ષી મધુરાવાસા મન્વશ્રહૃદયાશ્રયા ॥ ૧૮૯॥

માર્તાણ્ડવિનુતા માણિભદ્રેડ્યા માધવાર્ચિતા ।
માયા મારપ્રિયા મારસખીડ્યા માધુરીમનાઃ ॥ ૧૯૦॥

માહેશ્વરી માહિષઘ્ની મિથ્યાવાદપ્રણાશિની ।
મીનાક્ષી મીનસંસૃષ્ટા મીમાંસાશાસ્ત્રલોચના ॥ ૧૯૧॥

મુગ્ધાઙ્ગી મુનિવૃન્દાર્ચ્યા મુક્તિદા મૂલવિગ્રહા ।
મૂષિકારૂઢજનની મૂઢભક્તિમદર્ચિતા ॥ ૧૯૨॥

મૃત્યુઞ્જયસતી મૃગ્યા મૃગાલેપનલોલુપા ।
મેધાપ્રદા મેખલાઢ્યા મેઘવાહનસેવિતા ॥ ૧૯૩॥

મેનાત્મજા મૈથિલીશકૃતાર્ચનપદામ્બુજા ।
મૈત્રી મૈનાકભગિની મોહજાલપ્રણાશિની ॥ ૧૯૪॥

મોદપ્રદા મૌલિગેન્દુકલાધરકિરીટભાક્ ।
મૌહૂર્તલગ્નવરદા મઞ્જીરા મઞ્જુભાષિણી ॥ ૧૯૫॥

મર્મજ્ઞાત્રી મહાદેવી યમુના યજ્ઞસમ્ભવા ।
યાતનારહિતા યાના યામિનીપૂજકેષ્ટદા ॥ ૧૯૬॥

યુક્તા યૂપા યૂથિકાર્ચ્યા યોગા યોગેશયોગદા ।
(યક્ષરાજસખાન્તરા)
રથિની રજની રત્નગર્ભા રક્ષિતભૂરુહા ॥ ૧૯૭॥

રમા રસક્રિયા રશ્મિમાલાસન્નુતવૈભવા ।
રક્તા રસા રતી રથ્યા રણન્મઞ્જીરનૂપુરા ॥ ૧૯૮॥

રક્ષા રવિધ્વજારાધ્યા રમણી રવિલોચના ।
રસજ્ઞા રસિકા રક્તદન્તા રક્ષણલમ્પટા ॥ ૧૯૯॥

રક્ષોઘ્નજપસન્તુષ્ટા રક્તાઙ્ગાપાઙ્ગલોચના ।
રત્નદ્વીપવનાન્તઃસ્થા રજનીશકલાધરા ॥ ૨૦૦॥

રત્નપ્રાકારનિલયા રણમધ્યા રમાર્થદા ।
રજનીમુખસમ્પૂજ્યા રત્નસાનુસ્થિતા રયિઃ ॥ ૨૦૧॥

॥ ઇતિ શ્રીયોગનાયિકા અથવા શ્રીરાજરાજેશ્વરી સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by DPD, Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com, and PSA Easwaran

*Shri Shriyoganayika or RajarajeshvarI Sahasranama Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*